# Shrimad Venkatanatha Gurustotram

# શ્રીમદ્વેઙ્કટનાથગુરુસ્તોત્રમ્

## Document Information

Text title : Venkatanatha Guru Stotram

File name : venkaTanAthagurustotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Latest update : April 3, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીમદ્વેઙ્કટનાથગુરુસ્તોત્રમ્

॥ શ્રીરસ્તુ ॥

શ્રીમતે હયગ્રીવાય નમઃ ।
અસ્મદ્ગુરુપરમ્પરાભ્યો નમઃ ।
શ્રીકાઞ્ચી પ્રતિવાદિભયઙ્કરં જગદાચાર્યસિંહાસનાધીશ
શ્રીમદણ્ણઙ્ગરાચાર્યકૃતિષુ શ્રીમદ્વેઙ્કટનાથગુરુસ્તોત્રમ્ ।
શ્રીમાન્વેઙ્કટનાથાર્ય ઇતિ પદ્યાક્ષરક્રમાત્ ।
શ્રીમદ્વેઙ્કટનાથાર્યસ્તોત્રં વચ્મિ સતાં મુદે ॥

શ્રીમદ્વેઙ્કટનાથદેશિકમણિશ્શેષાદ્રિભૂષામણે-
ર્ઘણ્ટાંશઃ કુશિકાત્મજાન્વયસુધાસિન્ધોસ્સુધાદીધિતિઃ ।
શ્રીરામાનુજસૂરિવર્યકરુણાસમ્પ્રાપ્તવિદ્યોત્કરો-
ઽનન્તાર્યાહ્વયસોમસુત્સુતમણિર્મે સન્નિધત્તાં હૃદિ ॥ ૧॥

માનાતીતમહાગુણૌઘજલધિઃ માયીભકણ્ઠીરવઃ
માતઙ્ગાચલમૌલિમણ્ડનમણેઃ માન્યો મહાદેશિકઃ ।
મગ્નાન્ સંસૃતિસાગરે મિતમતીન્ માદૃગ્જનાન્ રક્ષિતું
મર્ત્યાકારમુપેયિવાન્ ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૨॥

વેતણ્ડાચલમણ્ડનસ્ય વરદસ્યાઙ્ઘ્રી સદા સંશ્રયન્
તસ્યૈવાદ્ભુતમાભિરૂપ્યમનિશં ચિત્તેઽનુભૂય સ્વયમ્ ।
વૈકુણ્ઠેઽપિ ન મેઽભિલાષ ઇતિ યઃ પ્રોચે મહાદેશિકઃ
સોઽયં પણ્ડિતમણ્ડલીપરિબૃઢો મે સન્નિધત્તાં હૃદિ ॥ ૩॥

કલ્પન્તે કિલ યસ્ય દેશિકમણેઃ શ્રીસૂક્તિરત્નોત્કરાઃ
સર્વેષામપિ દેહિનાં ભવભયોદ્વિગ્નાત્મનાં મુક્તયે ।
સોઽયં વેદશિરોગુરુર્યતિપતેસ્સિદ્ધાન્તમત્યદ્ભુતં
ભૂયોભિઃ કૃતિસઞ્ચયૈર્વિશદયન્ મે સન્નિધત્તાં હૃદિ ॥ ૪॥

ટઙ્કાદ્યૈર્બહુભિઃ પુરાણગુરુભિઃ પ્રાગેવ દૃષ્ટં તતઃ
    પશ્ચાત્ શ્રીયુતનાથયામુનયતિક્ષ્માભૃન્મુખૈર્વર્ધિતમ્ ।
સિદ્ધાન્તં ગુરુરાડસૌ બહુતમૈસ્સદ્ગ્રન્થવૃન્દૈર્નિજૈઃ
    સંવૃદ્ધં કલયન્ કલિપ્રમથનો મે સન્નિધત્તાં હૃદિ ॥ ૫॥

નાહં બોદ્ધુમલં ભવામિ નિગમાન્તાર્યસ્ય દિવ્યોક્તિષુ
    પ્રાજ્ઞૈકાનુભવાર્હમદ્ભુતતમં દિવ્યાર્થસારં સ્વયમ્ ।
કારુણ્યેન સુદુર્વચેન ભરિતસ્સોઽયં મહાદેશિકઃ
    સર્વાર્થાન્ સ્વયમેવ સાધુ ગમયન્ મે સન્નિધત્તાં હૃદિ ॥ ૬॥

"થાસસ્સે"-"ઢકિ લોપ"-"ઋત્યક"-"ઇકો યણ્"-"કુત્સિતે"-"ઙસ્સિધુટ્"
    "ઝેર્ઝસ્"-"ઝોઽન્ત" ઇતીદૃશાનિ સતતં સૂત્રાણિ સઙ્ક્રન્દતામ્ ।
શ્રેયઃ કિઞ્ચન નોદિયાદિતિ ધિયા સૂક્તીસ્સુહૃદ્યા અદાત્
    યો વેદાન્તમહાગુરુસ્સ કૃપયા મે સન્નિધત્તાં હૃદિ ॥ ૭॥

યઃ કારુણ્યનિધિર્યમાહ ભગવાન્ વેદાન્તસદ્દેશિકં
    યેનેદં ભુવનં સનાથમભવત્ યસ્મૈ નતિઃ શ્રેયસી ।
યસ્માદ્દિવ્યસુધોદયસ્સમભવત્ યસ્ય પ્રભાવોઽદ્ભુતઃ,
    યસ્મિન્ સર્વગુણા બભુઃ સ ગુરુરાણ્મે સન્નિધત્તાં હૃદિ ॥ ૮॥

કન્યામાસિ ફણીન્દ્રશૈલશિખરાલઙ્કારતીર્થોડુનિ
    પ્રાદુર્ભૂય ભવાબ્ધિમગ્નજનતાસંરક્ષણૈકવ્રતી ।
યઃ પ્રોવાચ શતાધિકાન્ સુમધુરાન્ સારાર્થરત્નાકરાન્
    સદ્ગ્રન્થાન્ સ ગુરુર્ગુણામૃતનિધિર્મે સન્નિધતાં હૃદિ ॥ ૯॥

વિશ્વત્રાણવિચક્ષણસ્સ ભગવાન્ ઘણ્ટાં સ્વકીયાં શુભાં
    તોતાદ્યાહ્વયદિવ્યયોષિદુદરે ન્યસ્યન્ સમા દ્વાદશ ।
પ્રાદુર્ભાવ્ય યદાત્મના વિભવનામ્ન્યબ્દે નભસ્યે નિજે
    નક્ષત્રે જગતીં ररક્ષ સ ગુરુર્મે સન્નિધત્તાં હૃદિ ॥ ૧૦॥

તાતો મે ભુવનપ્રસિદ્ધમહિમા વિદ્યાનિષદ્યાત્મકઃ
    યસ્ય શ્રીનિગમાન્તદેશિકમણેઃ શ્રીસૂક્તિરત્નાવલીઃ ।
આબાલ્યાન્મમ કણ્ઠભૂષણતયા વિન્યાસ્થત્ અન્યાદૃશઃ
    સોઽયં દેશિક આત્મનઃ કરુણયા મે સન્નિધત્તાં હૃદિ ॥ ૧૧॥

કિઞ્ચિજ્જ્ઞાનમુપેયુષામપિ સતાં યસ્ય ત્રયીશેખરા-
    ચાર્યસ્યાદ્ભુતસૂક્તિવૃન્દમનઘં હૃદ્યં હિ વિદ્યોતતે ।

ભક્તિં ભૂરિતમાં વિરક્તિમનઘાં વિજ્ઞાનમુચ્ચાવચં
    બિભ્રાણસ્સ મહાગુરુર્ગુણનિધિર્મે સન્નિધત્તાં હૃદિ ॥ ૧૨॥

કલ્લોલા ઇવ સાગરે ગુરુવરે યસ્મિન્ સદા સૂક્તયઃ
    પ્રાદુર્ભાવમનર્ગલં જનિજુષાં સૌભાગ્યભૂમ્ના દધુઃ ।
સોઽયં સર્વકલાવિહારનિલયઃ સર્વજ્ઞચૂડામણિઃ
    સર્વાનન્દનસદ્ગુણૌઘજલધિર્મે સન્નિધત્તાં હૃદિ ॥ ૧૩॥

કે વા સન્તિ મહીતલેઽત્ર વિપુલે વેદાન્તસૂરેર્ગિર-
    સ્સર્વાસ્સાધુ વિમૃશ્ય તસ્ય હૃદયં ગાઢં ગ્રહીતું ક્ષમાઃ ।
સોઽયં દેશિકસાર્વભૌમ ઇહ મામેકં કૃપાવૈભવાત્
    સ્વીયાન્તઃકરણજ્ઞમાશુ કલયન્ મે સન્નિધત્તાં હૃદિ ॥ ૧૪॥

સત્યં સત્યમહં બ્રવીમિ ભુવને નાન્યોઽવતીર્ણો ગુરુઃ
    ચારિત્રં પરમં પવિત્રમતુલાસ્સૂક્તીશ્ચ સન્દર્શયન્ ।
એકોઽયં શ્રુતિમૌલિદેશિકમણિઃ સર્વાત્મના શોભનઃ
    સોઽયં સીમદરિદ્રયા કરુણયા મે સન્નિધત્તાં હૃદિ ॥ ૧૫॥

રીઙ્કારં કલયન્તિ શીધુકણિકાં પીત્વા દ્વિરેફા વને
    સોઽહં વેદશિરોગુરોર્હિ ફણિતીઃ પીયૂષકલ્પા મુહુઃ ।
પાયમ્પાયમનર્ગલં વિરચયે તૌર્યત્રિકં ચત્વરે
    સોઽયં સર્વકલાનિધિર્ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૧૬॥

વેદાનાં પઠનં પુરાણકથનં સ્મૃત્યાદિસંશીલનં
    સર્વં યસ્ય ગુરોર્ગિરાં પરિચયૈઃ પુષ્ણાતિ શોભાં પરામ્ ।
સોઽયં સર્વપથીનધીવિલસિતો વૈરાગ્યવારાન્નિધિઃ
    શ્રીમાન્ વેદશિરોગુરુઃ પ્રતિકલં મે સન્નિધત્તાં હૃદિ ॥ ૧૭॥

દાન્તિશ્શાન્તિરિતિ દ્વયં હિ સકલૈસ્સમ્પાદનીયો નિધિઃ
    સોઽયં યસ્ય બભૌ સ્વભાવનિયતો લક્ષ્મીશસઙ્કલ્પતઃ ।
વાજિગ્રીવકૃપાકટાક્ષવિભવોદઞ્ચત્પ્રભાવોજ્જ્વલઃ
    સોઽયં દેશિકતલ્લજઃ સ્વકૃપયા મે સન્નિધત્તાં હૃદિ ॥ ૧૮॥

તાતોઽયં તનયોઽયમેષ સહજસ્સૈષા પ્રસૂઃ પત્ન્યસૌ
    ક્ષેત્રં મામકમેતદિત્યનવધિ પ્રોજ્જૃમ્ભમાણા તૃષા ।
સર્વા મે સમભૂદ્યદીયફણિતિષ્વેવ પ્રસિદ્ધપ્રથ-
    સ્સોઽયં નિસ્તુલવૈભવો ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૧૯॥

ચાર્વાકાદિમદુર્મતાન્ધતમસધ્વંસાર્થમુદ્યન્ રવિઃ
શ્રીમદ્વૈષ્ણવમણ્ડલીકુવલયોલ્લાસાય ભાસ્વાન્ વિધુઃ ।
સોઽયં વેદશિરોગુરુસ્સ ભગવાનિત્યેવમત્યાદરાત્
સર્વૈસ્સાધુગણૈઃ પ્રશસ્યમહિમા મે સન્નિધત્તાં હૃદિ ॥ ૨૦॥

યજ્ઞે ધાતુરુદિત્વરસ્સ વરદઃ શ્રીહસ્તિશૈલેશ્વરઃ
સ્વીયે વાહનમણ્ડપે પરમયા પ્રીત્યા યમાસ્થાપયન્ ।
વારંવારમનુગ્રહં પ્રકટયન્ વિદ્યોતતે તાદૃશ-
પ્રખ્યાતામિતવૈભવો ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૨૧॥

વર્ગે વૈષ્ણવશુદ્ધસન્તતિજુષાં શ્લાઘ્યાન્ અથાન્યૈરપિ
પ્રાજ્ઞૈર્ભૂરિતમૈઃ પ્રશસ્ય વિભવાન્ ગ્રન્થાન્ ગરિષ્ઠાન્ બહૂન્ ।
શ્રીમદ્વાજિમુખસ્ય દિવ્યકૃપયા નિત્યં સૃજન્ નિર્મલ-
પ્રજ્ઞો દેશિક એષ દોષવિધુરો મે સન્નિધત્તાં હૃદિ ॥ ૨૨॥

યોગ્યાનામયમગ્રગણ્ય ઇતિ ભુવ્યાખ્યામિહેપ્સુર્જનઃ
યસ્યાચાર્યમણેર્વિશુદ્ધફણિતિષ્વત્યાદરં પ્રાપ્નુયાત્ ।
સોઽયં શ્રીશતદૂષણીમુખમહાગ્રન્થાવલીખ્યાપિત-
પ્રજ્ઞાશેવધિરાદરેણ મહતા મે સન્નિધત્તાં હૃદિ ॥ ૨૩॥

મેદિન્યામિહ સર્વતઃ પ્રસૃમરા વિખ્યાતિરન્યાદૃશી
યસ્ય શ્રીનિગમાન્તદેશિકમણેર્નિત્યં સમુજ્જૃમ્ભતે ।
યસ્યાહુસ્સકલેઽપિ તન્ત્રનિચયે સ્વાતન્ત્ર્યમત્યઙ્કુશં
શ્રીમાનેષ ગુણાલયો ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૨૪॥

સન્દેહાન્ સકલાન્ હતાન્ વિદધતઃ પીયૂષસન્દેહદાન્
ગઙ્ગાપૂરસધર્મણશ્શુભતમાન્ દિવ્યાન્નિબન્ધાન્ બહૂન્ ।
ઉદ્ઘાટ્ય ક્ષિતિમણ્ડલં નિરુપમં નિષ્કલ્મષં ચાદધત્
વેદાન્તાર્યગુરૂત્તમઃ કરુણયા સે સન્નિધત્તાં હૃદિ ॥ ૨૫॥

નિત્યારાધનપેટિકાં મમ ગૃહે ધન્યાં વિતન્વંશ્ચિરાત્
સર્વાસામપિ સમ્પદાં મમ કુલે બીજાયમાનો મહાન્ ।
જ્ઞાનાનુષ્ઠિતિસમ્પદા સુમહિતઃ કણ્ઠીરવો વાદિનાં
ત્રય્યન્તાર્યમહાગુરુશ્શુભમતિર્મે સન્નિધત્તાં હૃદિ ॥ ૨૬॥

ધન્યો નાન્ય ઇહાસ્તિ કેવલમહં ધન્યાગ્રણીરિત્યમું

ગર્વં નિર્વહતિ પ્રસિદ્ધમહિમા યો દેશિકો મામકમ્ ।
સોઽયં ધન્યતમાં ધરાં વિદધતીસ્સૂક્તીરમેયાસ્સૃજન્
શ્રીમાન્ વેદશિરોગુરુર્મદજુષો મે સન્નિધત્તાં હૃદિ ॥ ૨૭॥

તામ્યદ્ભિર્બહુધા જનૈઃ પરિવૃતે ભૂમણ્ડલેઽસ્મિન્નહં
યસ્યાનુગ્રહપાત્રતામનિતરપ્રાપ્યામિહ પ્રાપ્નુવન્ ।
સન્તુષ્ટસ્સતતં પ્રફુલ્લહૃદયો દુઃખોક્તિવૈદેશિકો
વર્તેઃ સોઽયમમેયધીર્ગુરુવરો મે સન્નિધત્તાં હૃદિ ॥ ૨૮॥

સદ્વૃન્દૈસ્સહ નિત્યવાસરસિકં સઙ્ખ્યાતિગૈર્ભાવુકૈઃ
સંશ્રાવ્યોક્તિપરમ્પરં ચ કૃપયા યો માં વ્યધાદ્દેશિકઃ ।
સોઽયં દ્રાવિડસંસ્કૃતાદિસકલબ્રાહ્મીષુ કૂલઙ્કુષ-
પ્રજ્ઞો વેદશિરોગુરુર્મધુરવાક્ મે સન્નિધત્તાં હૃદિ ॥ ૨૯॥

દારિદ્ર્યં ક્ષપયન્ યશો વિશદયન્ વિજ્ઞાનમુજ્જૃમ્ભયન્
આચારં પરિપોષયન્ શુભમતિં સર્વત્ર સંવર્ધયન્ ।
ભક્તિં મેદુરયન્ હરૌ કિમધિકૈઃ સર્વાન્ ગુણાન્ જૃમ્ભયન્
શ્રીમદ્વેદશિરોગુરુર્મહિતવાક્ મે સન્નિધત્તાં હૃદિ ॥ ૩૦॥

હૃદ્યૈર્નિત્યમવદ્યગન્ધવિધુરૈરુચ્ચાવચૈર્મામક-
ગ્રન્થૈર્ભૂમિમિમાં સદા સુરભયન્ વેદાન્તસૂરિર્ગુરુઃ ।
પૂર્વાચાર્યસદુક્તિરત્નસતતાસ્વાદૈકસક્તાશયં
કુર્વન્માં કમનીયદિવ્યવપુષા મે સન્નિધત્તાં હૃદિ ॥ ૩૧॥

દિવ્યાકારજિતસ્મરઃ સુકવિતાચાતુર્યલીલાગૃહં
શુદ્ધાનુષ્ઠિતિકેલિસદ્મ ભગવદ્ભક્ત્યાકરોઽત્યદ્ભુતઃ ।
સન્દિગ્ધાર્થવિનિર્ણયેષુ ચતુરસ્સર્વાર્થસિદ્ધ્યાદિકા-
નેકગ્રન્થકૃદેષ દેશિકમણિર્મે સન્નિધત્તાં હૃદિ ॥ ૩૨॥

ઇત્થં વાદિભયઙ્કરવંશીયાણણ્ઙ્ગરાર્યસઙ્કુલિતમ્ ।
શ્રીમદ્વેઙ્કટનાથસ્તોત્રં પઠતાં સમૃદ્ધિરખિલા સ્યાત્ ॥

ઇતિ શ્રીકાઞ્ચી પ્રતિવાદિભયઙ્કરં શ્રીમદણ્ણઙ્ગરાચાર્યકૃતિષુ
શ્રીમદ્વેઙ્કટનાથગુરુસ્તોત્રં સમાપ્તમ્ ॥

Proofread by Aruna Narayanan

*Shrimad Venkatanatha Gurustotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*